એવં ધ્યાત્વા હૃત્સ્થાં યન્ત્રે પુષ્પાઞ્જલિ નિક્ષિપ્ય મનસા આવાહનાદિ આયુધાન્તામુદ્રાઃ પ્રદર્શ્યવાહ્યેઓક્ત પ્રકારેણ મૂલેન મૂર્તિ સમ્પૂજ્ય ષડઙ્ગાનિ સમ્પૂજ્ય આવરણદેવતાં પૂજયિત્વા પશ્ચાદ્ગન્ધપુષ્પધૂપદીપનૈવેદ્યા તામ્બૂલયથોક્તમાનસોપચારૈરભ્યર્ચ્ચ્ય પશ્ચાન્માતૃકામાલયા અષ્ટોત્તરશતં પ્રજપ્ય ગુહ્યેતિ મન્ત્રેણ સમર્પ્ય અથ હોમતન્ત્રમૂલાધારેષ્વાત્મા અન્તરાત્માપરમાત્મા જ્ઞાનાત્મેતિ ચતુરષ્ટાત્મકકુણ્ડં વિધાય તન્મધ્યે જુહુયાત્ ચિદ્ હૌં વિચિન્ત્ય તદ્યથા ધર્માધર્મવિર્દીપ્તે આત્માગ્નૌ મનસાકૃત્વા સુષુમ્નાવર્ત્મના નિત્યમક્ષવૃત્તીર્જુહોમ્યહં સ્વાહેતિ પઞ્ચાહુતિ હુત્વા પશ્ચાત્તત્રૈવ માવથવીં દેવીં ધ્યાત્વા ષડઙ્ગમન્ત્ર ષડાહુતિં હુત્વા ઐં હૃદયાય નમઃ । હૃદયદેવં સ્વાહા ॥

એવં ક્રમેણ પશ્ચાન્મૂલં સ્વાહા તૈઃ પઞ્ચવિંશાધાજુહુયાત્ પશ્ચાત્ પૂર્ણાહુતિં જુહુથા યથા પ્રકાશાકાશહસ્તાભ્યાં અવલમ્બ્યોન્મની શ્રુત ધર્માધર્મકલાસ્નેહપૂર્ણમગ્નિ જુહોમ્યહં સ્વાહેતિ તત્તેજઃ કોટીસૂર્ય પ્રતીકાશં ચન્દ્રકોટિસમપ્રભં વિદ્યુત્કોટિસમાભાસં મૂલાદિબ્રહ્મરન્ધ્રેતં એકાકારેણ ભાવયેત્ । નિત્યશુદ્ધબુદ્ધમુક્ત સત્યસ્વભાવે નિર્ગુણં નિરવયવં સર્વગતં અવસ્થાત્રય વિનિર્મુક્તં અસઙ્ગં સચ્ચિદાનન્દાદ્વયન્ત બ્રાહ્માહસ્મીતિ અભેદેનાવસ્થાનં સમાધિ । એવં સચ્ચિન્ત્યકૃતકૃત્યો ભવેત્ । ઇતિ પ્રાતઃ કૃત્યાદિમાનસીપૂજાન્તં કર્મ સમાપ્ય માનસં પૂજનં જાપ્યં માનસં હોમતર્પણમ્ । યાચનં અભિષેકં ચ મન્ત્રિણાં યતીનાં ફલદં મહત્ । ઇત્યન્તર્યાગઃ ॥

અથ બાહ્યપૂજા પશુજનવર્જ્યસ્થાને કુર્યાત્ । જપસ્થાનં પૂજાસ્થાનં માલા પુસ્તકદર્શનં સ્વભક્તેષુ મહેશનિદર્શનં ચૈવ કારયેત્ । અથ પૂજાપીઠનિર્ણયં યોગિનીતન્ત્રે લિઙ્ગસ્થાં પૂજયેત્ દેવં પુસ્તકસ્થાં તથૈવ ચ મણ્ડલસ્થાં

મહામાયાં મન્ત્રસ્થાં પ્રતિમા સુ ચ જલસ્થાં વા શિલાયાં વા પૂજયેત્પરમેશ્વરીં ઇતિ પીઠનિર્ણયઃ । તત્રધુ સૃણાદિલિપ્તે સુવર્ણાદિ પાત્રે સ્ફટિકે રક્તચન્દનપીઠે સિન્દૂરવેદિકાયાં વા સુવર્ણાદિશલાકયા ચક્રમુલ્લિખેત્ । સિદ્ધં વા પાતાલરેખં ગગનરેખં ભૂતસ્થં કૂર્મ પૃષ્ઠે ચ મેસ્તં વા તત્ર યન્ત્રનિર્માણં ઉક્તશારદાયાં પદ્મમષ્ટદલોપેતં ષટ્કોણં ચ ત્રિકોણકં કલાપત્રેન સંયુક્તં દ્વાત્રિંશદ્દલકર્ણિકાં ચતુર્દ્વાર સમાયુક્તં ત્રિરેખાભિઃ સમાન્વિતં ભૂગ્રહં વિલિખેત્તત્ર એવં પીઠં મનોહરં પુરોવૃત્તીપીઠે નિધાય ૐ ક્ષ્રૌં હ્રીં શ્રીં ક્લીં હં સં ખં ક્ષ્રૈં હ્રૌં હઃ ઇતિ મન્ત્રેણ બિન્દુચક્રે મૂર્તિ સઞ્ચિત્ય વસ્ત્રેણાછાદ્ય અથ પાત્રસ્થાપનં કુર્યાદ્યથા સાધ્યસાધકયોર્મધ્યે ષટ્ ત્રિશદઙ્ગુલં ભવેત્ દ્વાદશાઙ્ગુલમૂર્ધ્વે ચ અધોભાગે ષડઙ્ગુલં દ્વાદશાઙ્ગુલ મધ્યં તુ તત્ર સંસ્થાપયેદુધઃ । તત્ર સૌવર્ણં રાજતં તામ્રં મહાશઙ્ખં નાલિકેર અબ્જકાચ સમ્ભવં વા પાત્રં સંસ્થાપયેદ્બુધઃ તતોદ્વારપૂજોક્ત સ્વવામે સામાન્યાર્ધ્યં સંસ્થાપ્ય સ્વદક્ષભાગે તથૈવ પ્રોક્ષણીપાત્રં સંસ્થાપ્ય તેજ જલે ગન્ધાક્ષતપુષ્પાણિ સમ્પ્રોક્ષ્ય વમિતિધેનુદ્રયામૃતીકૃત્ય ઇતિ સામાન્યસંસ્કારઃ ॥

સામાન્યાર્ધ્યસ્યોર્ધભાગે કલશં સ્થાપયેદ્યથા યક્ષકર્દમાદિગન્ધમિશ્રિતજલેન ભૂમિ વિલિપ્ય યક્ષકર્દમે યથા કુઙ્કુમાગુરુકસ્તુરી કર્પૂરં ચન્દનં તથા મહાસુગન્ધમિત્યુક્તં નામતો યક્ષકર્દમઃ તત્ર મત્સ્યમુદ્રયા ષટ્કોણાન્તર્ગતં બિન્દુ વિલિખ્ય બાહ્યેવૃત્તં ચતુરસ્ત્રં ચ કૃત્વા સામાન્યાર્ધ્યોદકેનાપ્રોક્ષ્ય હી આધારશક્તિભ્યો નમઃ । ઇતિ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય નમઃ ઇત્યાધારં પ્રક્ષાલ્ય મણ્ડલે નિધાય મન્દશકલાવ્યાપ્તાત્મને વાહ્નિમણ્ડલાય નમઃ ઇતિ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય ફડિતિ ઘટં પ્રક્ષાલ્ય રક્તવસ્ત્રમાલ્યાદિના ભૂષયિત્વા ૐ મિતિમન્ત્રેણ ત્રિપદિકોપરિદેવબુદ્ધ્યાધારે સંસ્થાપ્ય અન્દ્વાદશકલાવ્યાપ્તાત્મને સૂર્યમણ્ડલાય નમઃ ઇતિ ઘટં સમ્પૂજ્ય મૂલંવિલોમમાતૃકામુચ્ચાર્ય કલશકારણેન સમ્પૂર્ણ્ય તત્ર ચન્દનાદિ નિક્ષિપ્ય ૐ ષોડશકલાવ્યાપ્તાત્મને સોમમણ્ડલાય નમઃ ઇતિ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય અસ્ત્રેણ સંરક્ષ્ય હુંઇત્યવગુણ્ઠ્ય મૂલેનવીક્ષ્યતેનૈવાભ્યુક્ષ્ય તારેણ પુષ્પાદિના સમ્પૂજ્ય દેવતાત્માકં વિભાવ્ય તતો શાપમોચનં કુર્યાદ્યથા કલશોપટિહસ્તં દત્વા મન્ત્રાણિ પઠેત્ ૐ સાં સીં સૂં સૈં સૌં સઃ શુક્રશાપવિમોચિતાયૈ સુરાદેવ્યૈ ઇતિ દ્વાદશાધા જપેત્ । ૐ વાં વીં વૂં વૈં વૌં વઃ બ્રહ્મશાપવિમોચિકાયૈ સુરદિવ્યૈ નમઃ ઇતિ ૧૦ ૐ હ્રીં શ્રીં ક્રાં ક્રીં ક્રૂં ક્રૈં ક્રૌં ક્રઃ સુધાવૃષ્ટાશાપવિમોચય અમૃતં સ્રાવયર સ્રાવયર સ્વાહા ઇતિ ૧૦ એકમેવ પરમ્બ્રહ્મ સ્થૂલસૂક્ષ્મમયં ધ્રુવં કચોદ્ભવાં બ્રહ્મહત્યાં તેન તે નાશયામ્યહં ઇત્યનેન બ્રહ્મશાપાદિમોચયસૂર્યમણ્ડલસમ્ભૂતે વરુણાલયસમ્ભવે અમામ્બીજમયે દેવ શુક્રશાપાદ્વિમુચ્યતાં ઇતિ શુક્રશાપવિમુક્તિઃ ॥

વેદાનાં પ્રણવો બીજં બ્રહ્માનન્દમયી યદિ તેન સત્યેન તે દેવિ બ્રહ્મહત્યાં વ્યપોહતુ । પાવમાનઃ પરાનન્દઃ । પાવમાનં પરોરસઃ । પાવમાનઃ પરંજ્ઞાનં તેન તે પાવયામ્યહં તતો કલશે આનન્દભૈરવાય નમઃ ઇતિ આનન્દભૈરવીં ધ્યાયેદ્યથા સૂર્યકોટિપ્રતીકાશં ચન્દ્રકોટિસુશીતલં અષ્ટાદશભુજં દેવં પઞ્ચવક્ત્રં ત્રિલોચનં અમૃતાર્ણવમધ્યસ્થં બ્રહ્મપરિસ્થિતં વૃષારૂઢં નીલકણ્ઠં સર્વાભરણભૂષિતં કપાલખટ્વાઙ્ગધરં ઘણ્ટાડમરુવાદિનં પાશાઙ્કુશધરં દેવં ગદામુસલધારિણં ખડ્ગખેટકપદ્દશમ્મુદ્ગરં શૂલદણ્ડકં વિચિત્રખેટકમ્મુણ્ડં વરદાભયપાણિનં લોહિતં દેવદેવેશં ભાવયેત્સાધકોત્તમઃ એવં ધ્યાત્વા હસક્ષમલવરયૂં આનન્દભૈરવાય વષટ્ ઇત્યાનન્દ ભૈરવં ત્રિઃ સમ્પૂજ્ય ભાવયેચ્ચ સુરાન્દેવીં ચન્દ્રકોટિયુતપ્રભાં હેમકુન્દેન્દુધવલામ્પઞ્ચવક્ત્રાં ત્રિલોચનાં અષ્ટાદશભુજૈર્યુક્તાં પાશાઙ્કુશ કરોદ્યતાં પ્રહસતી વિશાલાક્ષી દેવદેવસ્ય સત્સખીં એવં ધ્યાત્વા સહક્ષમલ વરયીં સુધાદેવ્યૈ વૌષટ્ ઇત્યાનન્દભૈરવીં ત્રિઃ સમ્પૂજ્ય તતો દ્રવ્યમધ્યે ત્રિકોણં વિલિખ્ય પશ્ચિમરેખામારભ્ય અં આં ઇત્યાદિ ઉત્તરકોણપર્યન્તં અ અં ઇત્યાદિપર્યન્તં તત્કોણમારભ્ય અગ્રકોણપર્યન્તં

કં ખં ઇત્યાદિપર્યન્તં તત્કોણમારભ્ય દક્ષિણકોણપર્યન્તં થં દં ઇત્યાદિસાન્તં હં ક્ષં મધ્યે આદિતાવ કં વર્ણમણ્ડલં ખણ્ડસિદ્ધિદં અન્તરુપત્ર સિતહ ક્ષરન્નલપતિપરાવઃ કથાશિવે પશ્ચાત્પૂલાધારા કુણ્ડલિનીમુત્થાપ્ય શિવેન સંયોજ્ય તરુદ્ધ લિતામૃતધારાં વહનીનાસાપુટેન દ્રવ્યમધ્યે પતિતાં વિભાવ્ય ગઙ્ગેચેતિ મન્ત્રેણ સૂર્યમણ્ડલાત્તીર્થાન્યાવાહ્ય એવમિતિધેનુમુદ્રયામૃતીકૃત્ય આત્મમુદ્રયાછાદ્ય હુમ્મિત્યવગુણ્ઠ્ય ચક્રેણ સંરક્ષ્યાસ્ત્રેણછોટિભિર્દિગ્બન્ધનં કુર્યાત્ ॥

અથ કલશ ધ્યાનમ્ । દેવદાનવસંવાદે મધ્યમાને મહોદધૌ ઉત્પન્નોઽસિ મહાકુમ્ભ વિષ્ણુનાવિધૃતકરે ત્વત્તોયે સર્વદેવા સ્યુઃ સર્વે વેદાઃ સમાશ્રિતાઃ ત્વયિ તિષ્ઠાન્તિ ભૂતાનિ ત્વયિ પ્રાણાઃ પ્રતિષ્ઠિતાઃ શિવસ્ત્વપ્રસિચાઙ્ગસ્ત્વં વિષ્ણુસ્ત્વં ચ પ્રજાપતિઃ આદિત્યાદ્યાગ્રહાઃ સર્વે વિશ્વેદેવાઃ સપૈતૃકાઃ ત્વયિ તિષ્ઠન્તુ કલશે યતઃ કામફલપ્રદાઃ ત્વત્પ્રસાદાદિમયં યજ્ઞં કર્તુમિહજલોદ્ભવં ત્વદાલોકનમાત્રેણ ભુક્તિમુક્તિફલપ્રદં સાન્નિધ્યં કુરુ ભો કુમ્ભ પ્રસન્નો ભવ સર્વદા । ઇતિ કલશધ્યાનમ્ ॥

કલ ઇતિ કલશધ્યાનં કલશે પ્રાણપ્રતિષ્ઠાં કુર્યાદ્યથા તસ્ય મસ્તકોપરિ લેલિહામુદ્રયા કરં દત્વા મન્ત્રં પઠેત્ ૐ આં હ્રીં ક્રોં હંસઃ સોહં શ્રીલક્ષ્મીનૃસિંહરાય અસ્મિનાધારસહિતકલશે અગ્નિસૂર્યસોમકલાનાં પ્રાણ ઇહ પ્રાણાઃ ૩૪ જીવ ઇહસ્થિતઃ ૩૪ સર્વેદ્રિયાણિ૩૪ વાઙ્મનત્વક્ચ્યક્ષુર્જિહ્વા શ્રોત્રપ્રાણપ્રાણા ઇહાગત્ય સુખં ચિરં તિષ્ઠન્તુ સ્વાહા ઇતિ પ્રાપ્રતિષ્ટાગન્ધદિભિઃ કલશં સમ્પૂજ્ય હંસઃ શુચિષત્વસુરં તરિક્ષસદ્ધોતા વેદિષત્ અતિથિર્દુરોપાસત્ નૃષદ્વરસદૃત્સહ્યોમસદબ્જા ગોજાઋતજા આદ્રિજાઋતમ્બૃહત્ ઇતિ ઋચાન્તસ્યોપરિ ત્રિઃ સઞ્જપ્ય તતશ્ચતુર્દિક્ષુ ચ મધ્યે પૂર્વોક્તં ગગનરત્નાય નમઃ । દક્ષિણે સ્લૂં સ્વર્ગરત્નાય નમઃ । પશ્ચિમે હ્યું પાતાલરત્નાય નમઃ । ઉત્તરે મ્લં પલ્યં રત્નાય નમઃ । મધ્યે મ્લં નાગરત્નાય નમઃ ॥

ઇત્થં પઞ્ચરત્નાનિ સમ્પૂજ્ય પઞ્ચમુદ્રયા નમસ્કૃત્ય ઇતિ કલશસ્થાપનં એતાસ્મિન્મયે દેવંહિતાયાદીનાં શોધનં યથા યં૯ મિતિશોષણં ર૯ મિતિ દાહનં વં૯ મિતિ અમૃતેન પ્લાવનં વમિતિ અમૃતેન પ્લાવન વમિતિધેનુમુદ્રયામૃતીકૃત્ય મૂલંઇકવચે નાવગુણ્ઠ્ય અસ્ત્રેણસંરક્ષ્ય એવં સંસ્કારં દ્વિતીયાચતુર્થીનાં સાધારણતયા બોદ્ધવ્યઃ ક્રમેણઋચં યજેત્ । ૐ પ્રતિદિક્ષુ સ્રવતો વીર્યેણ મૃગોન ભીમકુચરોગરિષ્ટાઃ યસ્યોરુષુ ત્રિષુવિક્રમણેવધક્ષિયાન્તિ ભુવનાનિ વિશ્વાઃ અનેન શુદ્ધેશુદ્ધિ । અથ તૃતીય શોધનં ૐ ત્ર્યમ્બકં યજામહે સુઙ્ગધિ પુષ્ટિવર્ધનં ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીયમામૃતાત્ । અથ ચતુર્થી શોધનં ૐ તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવીવચક્ષુ એતં તં તદ્વિ પ્રાશોન્ત્યવો જાગ્રીવાંસઃ સમિધતે વિષ્ણોર્યત્પરમં પદં મૂલેન કિઞ્ચિત્શુદ્ધિ કલશે નિક્ષિપ્ય કુમ્ભસમીપે ચન્દન રક્ત ચન્દન સિન્દૂર કુઙ્કુમૈકત્રમેલનેન ત્રિકોણવૃત્તચતુરસ્રં વિલિખ્ય તત્ર સર્વ પથિકદેવેભ્યો નમઃ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય તદુપરિ તીર્થભક્તશુદ્ધિમાનમુદ્રાન્વિતં બલિં નિધાય તત્ત્વમુદ્રયા તં બલિમુત્સૃજ્ય હ્રીં શ્રીં સર્વપથિક દેવેભ્યો નમઃ ઇતિ મન્ત્રેણ બલિં દદ્યાત્ । તં બલિં વામપાણિના ઉત્તુલ્ય મૂલમુચ્ચરન્ કલશોપરિ ત્રિધા ભ્રામ્ય પૂજાબાહ્યે નિક્ષિપેત્ ઇતિ કલશસ્થાપનમ્ ॥

અથ વિશેષાર્ઘ્યં તત આત્મચક્રયોર્મધ્યે ઉક્ત કર્દમેન મત્સ્યમુદ્રયા ત્રિકોણષટ્કોણવૃત્તચતુરસ્ત્રમ્મણ્ડલં વિધાય મધ્યેમાયાં વિલિખ્ય ચતુરસ્રકોણેષુ પ્રાદક્ષિણ્યે ન પીઠ ચતુષ્ટયં પૂજયેદ્યથા આગ્ન્યાદિકોણમારભ્ય ઈશાનકોણપર્યન્તં ૐ ઉડ્ડાણ પીઠાય નમઃ । જાલન્ધર પીઠાય નમઃ । ૐ પૂર્ણગિરિ પીઠાય નમઃ । ૐ કામરૂપ

પીઠાય નમઃ । ષટ્કોણેષુ ષડઙ્ગાનિ સમ્પૂજ્ય ત્રિકોણેષુ મૂલષડઙ્ગત્રયેણ સમ્પૂજ્ય મધ્યે હ્રીં આધારશક્ત્યૈ નમઃ ઇતિ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય નમઃ ઇત્યાધારં પ્રાક્ષાલ્ય મણ્ડલે નિધાય મન્દશકલાવ્યાપ્તાત્મને ધર્મપ્રદ વહ્નિ મણ્ડલાય નમઃ । ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય ગન્ધ મિશ્રિતાક્ષતેન તદુપરિ પ્રાદક્ષિણ્યેન કલાં પૂજયેદ્યથા યં ધૂમ્રાર્ચિષે નમઃ । રં ઉષ્માયૈ નમઃ । લં જ્વાલિન્યૈ નમઃ । વં જ્વાલિન્યૈ નમઃ । શં વિસ્ફુલિઙ્ગિન્યૈ નમઃ । ષં સુશ્રિયૈ નમઃ । સં સ્વરૂપાયૈ નમઃ । હં કપિલાયૈ નમઃ । લં હવ્યવાહાયૈ નમઃ । ક્ષં કવ્યવાહાયૈ નમઃ । ઇતિ સમ્પૂજ્ય અસ્ત્રેણ પ્રક્ષાલિતપાત્રમણ્ડલે નિધાય અં દ્વાદશકલાનામાત્મને અર્થપ્રદાર્કમણ્ડલાય નમઃ । ઇતિ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય પરિતઃ કલાં પૂજયેદ્યથા કં ભં તપિનિકલાં પૂજયામિ નમઃ । ખં વં નાપિનીકલાં પૂજયામિ નમઃ । ગં ફં ધૂમ્રાકલાં પૂજયામિ નમઃ । ઘં પં મરીચીકલાં પૂજયામિ નમઃ । ઙં નં જ્વલિનીકલાં પૂજયામિ નમઃ । ચં ધં રુચ્યૈકલાં પૂજયામિ નમઃ । છં દં સૂક્ષ્મીનાકલાં પૂજયામિ નમઃ । જં થં ભોગદાકલાં પૂજયામિ નમઃ । ઊં તં વિશ્વાકલાં પૂજયામિ નમઃ । અં ણં વાધિનીકલાં પૂજયામિ નમઃ । ટં ઠં ધારિણીકલાં પૂજયામિ નમઃ । ઠં ડં ક્ષમાકલાં પૂજયામિ નમઃ ઇતિ સમ્પૂજ્ય તતઃ કલશસ્થ દ્રવ્યં અન્યપાત્રેણોધૃત્ય વામહસ્તેન શુદ્ધિખણ્ડસ્પર્શધારયા મૂલં વિલોમ માતૃકા પઠન્ અર્ઘ્યપાત્રમાપૂર્ય તતો ન્હીં મિતિ બીજેનાઙ્ગુષ્ટેન અનામિકાભ્યાં ગન્ધમિશ્રિત પુષ્પેણ અર્ઘ્યસ્થ જલમાલોડ્ય ૐ ષોડશકલાવ્યાપ્તાત્મને કામપ્રદ સોમમણ્ડલાય નમઃ ॥

ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય પરિતઃ કલા પૂજયેદ્યથા અં અમૃતકલાં પૂજયામિ નમઃ । આં માનદાકલાં પૂજયામિ નમઃ । ઇં પૂષાકલાં પૂજયામિ નમઃ । ઈં તુષ્ટૌ કલાં પૂજયામિ નમઃ । ઉં પુષ્ટૌ કલાં પૂજયામિ નમઃ । ઊં ઋત્યેકલાં પૂજયામિ નમઃ । ઋં ધૃત્યૈકલાં પૂજયામિ નમઃ । ૠં શશિનીકલાં પૂજયામિ નમઃ । ૡં ઘણ્ટિકાકલાં પૂજયામિ નમઃ । ૡૃં કાન્ત્યૈકલાં પૂજયામિ નમઃ । એં જ્યોત્સ્ના કલાં પૂજયામિ નમઃ । ઐં શ્રિયૈકલાં પૂજયામિ નમઃ । ૐ પ્રીતી કલાં પૂજયામિ નમઃ । ઔં અઙ્ગદાકલાં પૂજયામિ નમઃ । અં પૂર્ણાકલાં પૂજયામિ નમઃ । અઃ પૂર્ણામૃતાકલાં પૂજયામિ નમઃ । ઇતિ સમ્પૂજ્ય તત્પ્રાધ્યેત્કુશેન ત્રિકોણં ષટ્કોણં વૃત્તચતુરસ્રં કૃત્વા તતઃ પૂર્વવત્ ત્રિકોણ ત્રિરેખાયાં અં આં૧૪ કં૪ ચં૪ ૮૪ તં૪ પં૪ યં૭ એવં વિલિખ્ય મધ્યે હં ક્ષં મૂલખણ્ડત્રયે ત્રિકોણં સમ્પૂજ્ય ષટ્કોણં ષડઙ્ગાનિ સમ્પૂજ્ય ચતુરસ્રકોણેષુ પૂર્વવત્ ઉજાપુકાનિ સમ્પૂજ્ય તતો ગઙ્ગેચેનિમન્ત્રેણકુશ મુદ્રયા સૂર્યમણ્ડલાત્તીર્થાન્યાવાહ્ય પશ્ચાદાનન્દભૈરવાનન્દ ભૈરવ્યૌ પૂર્વવત્ તત્તન્મન્ત્રેણ સમ્પૂજ્ય પુનઃ પૂર્વવત્ રત્નમન્ત્રેણ સમ્પૂજ્ય લૂં ગગનરત્નેભ્યો નમઃ । ઇત્યાદિ તતો વિષ્ણુર્યોનિં કલ્પયતુત્વષ્ટારૂપાણિપિસુતુઃ આસિઞ્ચતુઃ પ્રજાપતિર્ધાતા ગર્ભં દધાતુ તે ॥

ગર્ભં દેહિ સિનીવાલી ગર્ભં દેહિ સરસ્વતી ગર્ભં તે હ્યાશ્વિનૌ દેવાવાધત્તામ્પુષ્કર સ્રજેતિ લ્લૂં સ્લૂં ગ્લૂં જ્લૂં સ્વાહા અમૃતે અમૃતોદ્ભવે અમૃતવર્ષિણિ અમૃતં શ્રાવયર સ્વાહા તસ્યોપરિ સમ્પઠેત્ હુમ્મિત્યવગુણ્ઠ્ય વમિતિધેનુમુદ્રયામૃતીકૃત્ય મત્સ્યમુદ્રયાછાદ્ય ચક્રેણસંરક્ષ્યાસ્ત્રેણ તાલત્રયચ્છોટિકાભિર્દિગ્બન્ધનં કૃત્વા તદુપરિમૂલમષ્ટધા સઞ્જપ્ય પ્રાણપ્રતિષ્ઠાં કુર્યાદ્યથા ૐ આં હ્રીં ક્રૌં હંસઃ સોહં સ્વાહા । શ્રીલક્ષ્મી નૃસિંહાય વિશેષાર્ઘ્યસ્ય અસ્મિન્નાધારસહિત આગ્નિસૂર્યસોમકલાનાં પ્રાણ ઇહ પ્રાણા એવં જીવ સર્વોદ્રિયાણિ વાઙ્મનત્વક્ ચક્ષુર્જિહ્વાશ્રોત્ર ઘ્રાણપ્રાણ ઇહાગત્ય સુખં ચિરં તિષ્ઠન્તુ સ્વાહેતિ પ્રાણપ્રતિષ્ઠા૧૫ ૐ પ્રજપ્યપઞ્ચોપચારૈઃ અયં સમ્પૂજ્ય પઞ્ચમુદ્રયા નમસ્કૃત્ય તતઃ સામાન્યવિશેષાર્ઘયોર્મધ્યે ગુરુપાત્રં વીરપાત્રં ભાગપાત્રં યોગિનીપાત્રં શક્તિપાત્રં માત્મપાત્રં બલિપાત્રં ચ સામાન્યાર્ઘ્યોક્ત વિધિના સ્થાપયેત્ પાદ્યાર્ચમન મધુપર્કપાત્રાણિ ચ વિશેષાર્ઘોત્તરગાનિ તથૈવ સંસ્થાપ્ય

શુદ્ધોદકૈરાપૂર્ય ગન્ધપુષ્પાક્ષતૈરભ્યર્ચ્ય પુષ્પાદિનાવિશેષર્ઘ્યં બિન્દુમુદ્ધૃત્ય સર્વપાત્રે ક્ષિપેત્ । ઇતિ પાત્રસ્થાપનવિધિઃ ॥

એવં પાત્રાસાદના અશક્તશ્ચેત્ કલશસામાન્ય વિશેષ પ્રોક્ષણીપાણિસંસ્થાપ્ય તદોક્તં ચન્દ્રપીઠે વામે શઙ્ખં પ્રતિષ્ઠાપ્ય મધ્યે ચાર્ઘ્યં પ્રકલ્પયેત્ દક્ષિણે પ્રોક્ષણી ચાર્ઘ્યં અર્ઘ્યં ત્રયેતિ કલ્પનાત્ તત્રવચનં એકપાત્રં ન કુર્વીત યદિ સાક્ષાત્કુલેશ્વરઃ મન્ત્રાશ્ચ પ્રાઙ્મુખાયાન્તિ વિદ્યૈવ પદે પદે । ઉક્તં ચરત્રેશ્વરે દૃષ્ટ્વાર્ઘપાત્રં દેવેશિ બ્રાહ્માદ્યા દેવતા સદા નૃત્યન્તિ સર્વયોગિન્યઃ પ્રીતાઃ સિદ્ધિદદત્સ્વપિ સ્વદક્ષભાગે ગન્ધપુષ્પાક્ષતાનિસ્વપૃષ્ઠ ભાગેકર પ્રક્ષાલનાર્થ પાત્રં સંસ્થાપ્ય તતઃ પ્રોક્ષણીપાત્રજલેન પુષ્પાણિ પ્રોક્ષયેદ્યથા ૐ પુષ્પકેનુરાજાર્હતે શતાય સભ્ય સમ્બન્ધાય ૐ પુષ્પે પુષ્પે મહાપુષ્પેસુ પુષ્પે પુષ્પસમ્ભવે પુષ્પવચ્ચયાવકીર્ણે હું ફટ્ સ્વાહેતિ પુષ્પશુદ્ધિવિધાય હું ફડિતિ મન્ત્રેણ નારાચમુદ્રયા સીમદૃષ્ટિ પુષ્પસ્યાવલોકનેન ગન્ધાદિ સર્વભારં દિગ્બન્ધનં વિધાય દેવતા દક્ષભાગે ઘૃતદીપંસંસ્થાપ્ય વામે તૈલમયં દીપં સંસ્થાપ્ય ઘૃતન્દીપં સુદર્શનમન્ત્રેણ પૂજયેદ્યથા । રાં રીં રૂં રૈં રૌં રઃ ૐ સહસ્રાર હં ફ્ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય તૈલદીપાશુપતાસ્મે સમ્પૂજ્ય ૐ શ્લીં પશું હું ફટ્ દીપદ્વયં ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય હસ્તદ્વયેનદીપશિખાં સ્પૃષ્ટાવ મન્ત્રં પઠેદ્યથા ઘોરાય ઘોર તમાય મહાદ્યથા ઘોરાય ઘોર તમાય મહારૌદ્રાય વીરભદ્રાય જ્વાલામાલિને સર્વપ્રાણોપસંહર્ત્રે હું ફટ્ સ્વાહેતિ પઠિત્વાત્માનં તત્તેજસાસમ્માર્ય તતો ત્વક્કાયચિત્સોધયેદ્યથા ૐ હું ફટ્ સ્વાહેતિ મુખે । ૐ રક્ષ રક્ષ ફટ્ સ્વાહેતિ હૃદિ હસ્તં દત્વા માત્મારાં વિધાય ઓમ્મિતિ મન્ત્રેણ ચન્દનપુષ્પાણિ કરાભ્યામ્મર્દયિત્વા તાનિ વામ હસ્તે સમાદાય આઘ્રાય તે સર્વે વિલયં યાન્તુ યે માં હિંસિતિ હિંસિકાઃ મૃત્યુ રોગ ભયક્લેશાઃ પતન્તુ રિપુમસ્તકે ઇતિ મન્ત્રેણ ઈશાન્યાં દિશિ દૂરતઃ ક્ષિપેત્ । હસ્તૌ પ્રક્ષાલ્યાચમ્ય સામાન્યાર્ઘ્યાદકેન સઙ્કલ્પં કુર્યાત્ ૐ અદ્યેત્યાદિ સ્મૃત્વા શ્રીલક્ષ્મીનૃસિંહરાયપ્રીત્યર્થે બહિઃ પૂજામહં કરિષ્યેતિ સઙ્કલ્પઃ ॥

તતઃ સ્વપુરોભાગે આદૌ સર્વવિઘ્નનિવારણાર્થે મહાવિદ્યા તિરસ્કારિણીં ધ્યાયેચ્ચ પૂજયેચ્ચ જપેદ્યથા । નીલં હયં સમાધિરુહ્ય પ્રયાતિ નીલાંશુકાભરણ માલ્યવિલેપનાદ્યા નિદ્રાપુટેનભુવનાનિતિરોદધાના ખડ્ગાયુધાભગવતિ પરિપાતુ ભક્તાન્ । એવં ધ્યાત્વા ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય અગ્રે કિઞ્ચિચ્છુદ્ધયુક્ત વિદુધારયા સન્તાર્પ્ય મન્ત્રદ્વયં પઠેદ્યથા હ્રીં શ્રીં નમો ભગવતિ માહેશ્વરિ સર્વ પશુજનમનઃ ચક્ષુસ્તિરસ્કરિણીં કુરુ કુરુ સ્વાહા હ્રીં ક્રીં ઐં ૐ તિરસ્કારિણીં સકલ જનવાગ્વાદિની સકલપશુજને મનઃચક્ષુષી શ્રોત્રજિહ્વાઘ્રાણતિરસ્કારિણીં કુરુ કુરુ ઠઃ ઠઃ સ્વાહા । ઇતિ પઠયિત્વા નમસ્કૃત્ય તતો દક્ષહસ્તે તર્જનીઙ્ગુષ્ઠાભ્યાં ગન્ધપુષ્પે ગૃહિત્વા વામે તત્ત્વમુદ્રયાશુદ્ધિરખણ્ડં ગૃહિત્વા ગુરુપાત્રામૃતેન શિરસિ ઐં હ્રીં શ્રીં અમુકાનન્દનાથ અમુકીદેવ્યં વા શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ । એવં પરમગુરું પરાત્પરગુરું પરમેષ્ટિગુરું સમ્પૂજ્ય સન્તાર્પ્ય તથૈવ દેવપાત્રામૃતેન સ્વહૃદિમૂલમુચ્ચાર્ય્ય શ્રીલક્ષ્મીનૃસિંહાય પૂજયામિ નમઃ ત્રિઃ ॥

તતસ્તત્ત્વશુદ્ધિં કુર્યાદ્યથા સ્વવામકરતલે કારણેન ત્રિકોણં વિલિખ્ય શુદ્ધિખણ્ડત્રયં ત્રિકોણે સંસ્થાપ્યૈકં મધ્યે સંસ્થાપ્ય ઐં આત્મનત્વેન સ્થૂલદેહં શોધયામિ સ્વાહેત્યગ્રસ્થાં સ્વીકૃત્ય ક્લીં વિદ્યાતત્વેન સૂક્ષ્મદેહં શોધયામિ સ્વાહેતિ દક્ષિણસ્યાં સ્વીકૃત્ય સૌઃ શિવતત્વેન કારણદેહં શોધયામિ સ્વાહેતિ વામસ્થાં સ્વીકૃત્ય સમગ્રેણ સર્વ તત્વૈસ્તત્વત્રયાશ્રયં જીવં શોધયામિ સ્વાહેતિ મધ્યસ્થાં સ્વીકૃત્ય ૐ આં ઈ જ્વલતિજ્જ્યોતિરહમાસ્મિજ્જ્યોતિર્જ્વલતિ બ્રહ્માહમસ્મિ યોઽહમસ્મિ બ્રહ્માહમસ્મિ । અહમસ્મિ

બ્રહ્માહમસ્મિ અહ્માસ્મિ બ્રહ્માહમસ્મિ અહમેવહમ્માઙ્જુહોમિ સ્વાહા ઇતિ મન્ત્રેણ શઙ્ખસ્થબિન્દુ અન્યપાત્રે ગૃહિત્વા કુણ્ડલિની જિહ્વાગ્રે સમાનીય તન્મુખે દદ્યાદિતિતત્ત્વશુદ્ધિઃ ॥

તતો દેવપાત્રામૃતેન આત્માનં પૂર્વસ્થાપિતયન્ત્રે પીઠન્યાસ વત્પીઠપૂજાં કૃત્વા મણ્ડૂકાદીન્ ધ્યૌઃ સદાશિવ મહાપ્રેતપદ્માસનાય નમઃ ઇત્યન્તં પઠેત્ પ્રાણપ્રતિષ્ઠાં કુર્યાદ્યથા ૐ આં હ્રીં ક્રૌં હ્રૌં હંસઃ સોહં શ્રીલક્ષ્મીનૃસિંહરાય પીઠસ્ય પ્રાણ એવં જીવ૧૯ સર્વોન્દ્રયાણિ૧૯ વાઙ્મનઃ ત્વક્ચક્ષુજિહ્વાશ્રોત્રઘ્રાણપ્રાણ ઇહાગત્ય સુખં ચિરં તિષ્ઠન્તુ સ્વાહેતિ પ્રાણપ્રતિષ્ઠા । વામિતિધેનુમુદ્રયાઽમૃતીકૃત્ય હુમિત્યવગુણ્ઠ્ય અસ્મેણછોટિકાભિર્દિગ્બન્ધનં કુર્યાત્ । ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય નમસ્કૃત્ય તતઃ સ્વાશિરસિ કરસમ્પુટેન ગુરું નમસ્કૃત્યાસ્મેણ છોટિકાભિર્દિગ્બન્ધનં કુર્યાત્ પૂર્વવત્પ્રાણાનાયામ્ય ઋષ્યાદિ કરષડઙ્ગાનિ કૃત્વા તતશ્ચક્રસ્થપ્રેતાસનોપરિમૂલેન મૂર્તિં વિચિન્ત્યાત્માનં કામકલારૂપં વિભાવ્ય ત્રિષણ્ડામુદ્રયા પુષ્પાણિ ગૃહિત્વા મૂલાધારાત્કુણ્ડલિનીં બ્રહ્મરન્ધ્રપથેન શિરસ્થાં શિવેન સંયોજ્ય તત્રામૃતે લોલીભૂતાં હૃદયસ્થારક્તપઙ્કજે સમાનીય સદભેદેમૂલેન દેવં ધ્યાયેદ્યથા તપનસોમહુતાશનલોચનં ઘનસમાનગલં શશિસુપ્રભં અભયચક્રપિનાકવરાન્કરૈર્દધનબિન્દુધરં નૃહરિં ભજે૧ ॥

શ્રીમન્નૃકેસરિતનોજગદેકબન્ધોઃ ।<br>
શ્રીનીલકણ્ઠ ચ કૃણાર્ણવસામરાજ વહ્નિદુ ।<br>
તીવ્રકરનેત્રપિનાકપાણે ।<br>
શિતાંશુ શેખર રમેશ્વર પાહિ વિષ્ણોઃ ॥

સ્વર્ણાંસ્તાર પુટાત્મપાદપતલેસદ્રત્ન પીઠેમ્બુજેશોણાભે વસુપત્રકે સ્થિતમજં પીતામ્બરાલઙ્કૃતં યેભૂતાભવનેકભૂષણયુતં ગોગોપગોપીવૃતં ગોવિન્દં સ્મરસુન્દરં મણિભુજં વેણું રણાન્તં સ્મરેત્ ૩ કલ્પાનોકુહસ્થાંસ્થિતાતિવદુષોરાજોન્નતાં સંસ્થિતાં પૌષ્યંવાણમથે ક્ષુચાપકમલે પાશાઙ્કુશે બિભ્રતીં ચક્રં શઙ્ખગદૈકરૈરુદ્રાદ્વિજાંસાંશ્લિષ્ટદેહં હરિં નાનાભૂષણરક્ત લેપકુસુમં પીતામ્બરં સંસ્મરે ક્ષીરાબ્ધિવસુમુખ્યદેવનિકરૈરગ્રાદિમં વેષ્ઠિતં શઙ્ખ ચક્રગદામ્બુજં નિજકરૈર્વિભ્રન્ત્રિનેત્રઃ સિતઃ સર્પાધિશફણાનેતપત્રલસતાં પીતામ્બરાલઙ્કૃતો લક્ષ્યાશ્લિષ્ટકરવરો નરહરીસ્તાન્નીલકણ્ઠો મુદેપ વિજયેનયુતોરથસ્થિતઃ પ્રસમાનીય સમુદ્રમધ્યતઃ પ્રદદન્નનયાત્ દ્વિજન્મે સ્મરણીયો વસુદેવનન્દનઃ ૬ નૃસિંહોમાધવારૂઢો લોહિતો નિગમાદિમઃ કૃશાનુભીયપિઞ્ચાણો મનુષિષહરઃ પરઃ ૭ મહાપદ્મં તથા પદ્મં શઙ્ખં મકારકછપૈઃ મુકુન્દકુન્દનીલશ્ચનિધીન્દિક્ષુ સમર્ચયેત્ ૮ મહાપદ્મવનાન્તરસ્થેકરુણાતન્દવિગ્રહ સર્વભૂતહિતે તાત એહ્યેહિ પરમેશ્વર૯ દેવેશભક્તસુલભે પરિવાર સમન્વિતે યાવત્ત્વાં પૂજયિષ્યામિ તાવદ્દેવસ્થિરો ભવ ૧૦

ઇતિ ધ્યાત્વા ઇતિ મન્ત્ર પઠન્ પુષ્પાનિબિન્દુપરિતઃ મૂર્તી ક્ષિપેદ્યથા હ્યૌં કનિષ્ઠાપુષ્પં આસનસ્થાને નિક્ષિપ્ય ૐ ક્ષ્રૌં મધ્યમાપુષ્પેણ તત્તેજસાં સંયોજ્ય હ્ત્રૌઃ અઙ્ગુષ્ઠપુષ્પેણ છત્રં વિભાવ્યમૂલેન અઞ્જલિપુષ્પેણ સાવયવં વિચિન્ત્ય આવાહનાદિ આયુધાન્તા મુદ્રાપ્રદર્શ્યામૂલેન શ્રીલક્ષ્મીનૃસિંહાય સાઙ્ગાય સપરિવારે સાયુધે સવાહને ઇહાગત્ય ઇહારાબાહ્યા પુનર્મૂલેન અમુકન્દેવસાઙ્ગાયેતિ સ્થાપનીમુદ્રયા સંસ્થાપ્ય પુનર્મૂલે અમુકદેવસાઙ્ગાયેતિ સન્નિધાય મુદ્રયા સન્નિધાય પુનર્મૂલેન અમુકદેવં સન્નિરોધનમુદ્રયા સન્નિરુધ્ય પુનર્મૂલેન અમુકદેવસાઙ્ગાયેતિ સન્મુખીમુદ્રયા સન્મુખી ભવ ષડઙ્ગેકેશકલીકૃત્ય હુમ્મિતિ અવગુણ્ઠ્ય ધેનુમુદ્રયામૃતીકૃત્ય મહામુદ્રયા પરમીકૃત્ય શઙ્ખચક્રગદાપદ્મ એવં મુદ્રામ્પ્રદર્ત્યૂં લેલિહામુદ્રયાજીવન્યાસઙ્કુર્યાદ્યથા ૐ આં હ્રીં ક્રોં હોં હંસઃ સોહં શ્રીલક્ષ્મીનૃસિંહાય પ્રાણ ઇહપ્રાણા

પુનઃ જીવ ઇન્દ્રિયાણી વાઙ્મને પુનઃ પૂર્વસમ્મુચ્ચાર્ય ઇદમાચમનં દદ્યાત્ । પૂર્વવત્સમુચ્ચાર્ય મધુપર્કં સમર્પયામિ નમઃ । મુખેવ ત્રિઃ પુનઃ પૂર્વવદાચ મનં દદ્યા । ઇતિ પ્રાણપ્રતિષ્ઠા ॥

તતો જન્માદિ દ્વિષ્ટ સંસ્કારાર્થે ૧૫ પ્રણવં જપેત્ । તતઃ પાદુકામુદ્રાં પ્રદર્શ્ય પૂજામણ્ડપાત્સ્નાનમણ્ડપેરત્નાસિંહાસનોપરિ આવાહ્ય તતઃ પાદ્યપાત્રામૃતેન મૂલાન્તે શ્રીમત્ લક્ષ્મીનૃસિંહાય પાદ્યં સમર્પયામિ નમઃ । પાદયોઃ અર્ઘ્યં પાત્રામૃતેન પૂર્વવત્સમુચ્ચાર્ય ઇદમર્ઘ્યં સ્વાહેતિ શિરસિ ત્રિઃ પૂર્વવત્સમુચ્ચાર્ય આચમનીયાન્નામૃતેન મુખે આચમનં દદ્યાત્ ચ ત્રિઃ પૂર્વવત્સમુચ્ચાર્ય ઇદં સ્નાનં સમર્પયામિ નમઃ । સર્વાઙ્ગે દત્વાવારત્રયં પુનઃ આચમનં દદ્યાત્ ॥

અઙ્ગમાર્જનાર્થં ધૌતવસ્ત્રં સમર્પયામિ નમઃ । એવં વસ્ત્રાણિ સમર્પયામિ નમઃ । એવં યજ્ઞોપવીતં સમર્પયામિ સ્નાનાન્મણ્ડયાત્ ભૂષણમણ્ડપે આવાહ્ય એવં ભૂષણાનિ સમર્પયામિ નમઃ । એવં ગન્ધં સમર્પયામિ નમઃ । એવં પુષ્પાણિ વૌષટ્ પુષ્પાણિ સમર્પયામિ નમઃ । એવં ધૂપં સમર્પયામિ નમઃ । દીપં સમર્પયામિ નમઃ । એવં પક્વાન્નં નૈવેદ્યં સમર્પયામિ નમઃ । એવં તામ્બૂલં સમર્પયામિ નમઃ । પુનઃ પાદુકામુદ્રામ્પ્રદર્શ્ય ભૂષણમણ્ડપાત્પૂજામણ્ડપે દેવમાવાહ્ય પુનઃ ગન્ધપુષ્પધૂપદીપાનિ દત્વા શ્રૃઙ્ગારારાત્રિકં કૃત્વા તતઃ પઞ્ચપુષ્પાઞ્જલિં દદ્યા યથા-મૂલમુચ્ચાર્ય શિરસિ હૃદિ ગુહ્ય પાદસર્વાઙ્ગેષુ પુનઃ પુષ્પાઞ્જલિમાદાય સિઞ્ચિન્મયે પરે દેવ પરામૃતસચપ્રિયે અનુજ્ઞાં દેહિ દેવ સપરિવારાર્ચનાય મે એવં પ્રાર્થયિત્વા પુષ્પાઞ્જલિ ક્ષિપેત્ । પૂજારમ્ભે શ્રીલક્ષ્મીનૃસિંહાયસ્મિવિધાનર્ચયેદ્ગુરુન્ દિવ્યૌઘચૈવસિદ્ધૌઘાર્મનવૌઘ ઇતિ ત્રિધા મધ્યત્રિકોણોપરિ ત્રિરેખાયાં પૂજયેદ્યથા તતો દક્ષહસ્તે અઙ્ગુષ્ઠતર્જનીભ્યાં ગન્ધમિશ્રિતપુષ્પાક્ષતાનિ ગૃહિત્વા વામેન મુદ્રયા શુદ્ધિખણ્ડં ગૃહીત્વા ગુરુપાત્રામૃતેન તર્પયેત્ ॥

ૐ ક્ષ્રૌં પરમપ્રકાશાત્ અનેનાથ શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પરશિવાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પરશક્ત્યાં વા શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કૌલેશ્વરાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં શુક્રદેવ્યામ્બાશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કુલેશાનન્દનાથ શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કામેશ્વર્યમ્બાશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇતિ દિવ્યૌઘા એનં એકપઙ્ક્ત્યા પૂજયેત્ ।
ૐ ક્ષ્રૌં ભોગાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ક્લિન્નાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સમયાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સહજાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇતિ સિદ્ધૌઘા એવં દ્વિતીયા પઙ્ક્ત્યા પૂજયેત્ ।
ૐ ક્ષ્રૌં ગગનાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિશ્વાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિમલાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ ક્ષ્રૌં મદનાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ભુવનાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં લીલાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં આત્માનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પ્રિયાનન્દનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇતિ માનવૌઘાઃ । એનં તૃતીયાપઙ્ક્ત્યાં પૂજયેત્ ।
ૐ ઐં હ્રીં શ્રીં હંસં ખઙ્ક્રે રુસક્ષમખર યૂં સહ સહક્ષમલવરયીં શ્રી અમુકાનન્દનાથ અમુકી અમ્બાશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
એવં પરમગુરું શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
એવં પરાત્પરગુરું શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
એવં પરમેષ્ટીગુરું શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇતિ ગુરુપરમ્પરાં પૂજયેત્ ।

અથ ષડઙ્ગદેવપૂજનમ્ । ૐ ક્ષ્રૌં સર્વજ્ઞતાહૃદયાય નમઃ । હૃદે દેવશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । ૐ ક્ષ્રૌં નિત્યમનુપ્તાય શિરસે સ્વાહા । શિરોદેવ શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । ૐ ક્ષ્રૌં અનાદિબોધિતાશિખાયૈ વષટ્ શિખાદેવશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । ૐ ક્ષ્રૌં સ્વતન્ત્રાય કવચાય હું કવચદેવશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । ૐ ક્ષ્રૌં નિત્યમલુપ્તાયનેત્રત્રયાય વૌષટ્ નેત્રત્રયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । ૐ રૌં અનન્તાય અસ્માય ફટ્ ઇતિ ત્રિકોણાન્તરાલે અગ્નિશા સુખાયવ્યકુનેષુ ચતુષ્ટ્યં સમ્પૂજ્ય પુરુતોનેત્રં દિક્ષુસર્વાસુ અસ્મં પૂજયેત્ । ઇત્યઙ્ગદેવપૂજનં તતો શઙ્ખમુદ્રાં પ્રદર્શ્ય પરિવારાર્ચનાનુજ્ઞાંલબ્ધ્વા વા પરિવારાર્ચનમારભેત્ મૂલેનબિન્દુત્રિવારેણકોણે સમ્પૂજ્ય મધ્યત્રિકોણાગ્રે બ્રહ્મણે સાવિત્રીસહિતાય શ્રીલક્ષ્મીનૃસિંહાય શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । અગ્નીકુણે વિપ્લવે લક્ષ્મીસહિતાય નૃસિંહાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । ઈશાનકોણે રુદ્રાયસરસ્વતી સહિતાય લક્ષ્મીનૃસિંહાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ । મૂલેન દેવં ત્રિવારં તર્પયેત્ । પુષ્પાજલિં દદ્યાત્ । અભીષ્ટસિદ્ધયે દેવ શરણાગતવત્સલ ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનં૧ ઇતિ પ્રથમાવરણં પાદયોઃ પુષ્પાઞ્જલિં દદ્યાત્ । સ્વાગ્નાદિદક્ષાવૃત્તેન ષટ્કોણેષુ પૂજયેત્ ॥

ૐ ક્ષ્રૌં શઙ્કર શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં શેષનાગશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં શતાનન્દશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં હ્રીં યં શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ધૃતિશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પુષ્ટીશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
કોણપત્રેષુ પૂજયેત્ મૂલેનમૂલદેવતાં ત્રિવારં તર્પયેત્ । પુષ્પાઞ્જલિં દદ્યાત્
અભીષ્ટ ઇત્યાદિ દ્વિતીયાવરણર્ચનં ચક્રમુદ્રાં પ્રદર્શ્ય અષ્ટદલપત્રેષુ

સ્વાગ્રાદિમારભ્યવાયવ્યદલાન્તં પૂજયેત્ ।
ૐ ક્ષ્રૌં લક્ષ્મીશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સરસ્વતીશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ચાપિની શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પ્રીતિશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કીર્તિશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કાન્તિશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં તુષ્ટીશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં શ્રિયં શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
મૂલેનમૂલદેવતાં ત્રિવારં તર્પયેત્ । અભીષ્ટસિદ્ધયેતિ તૃતીયાવરણાર્ચનં ગદામુદ્રાં પ્રદર્શ્ય પુષ્પાજલિં દદ્યાત્ । ષોડશપત્રેષુસ્વાપ્રાદિમારભ્ય પ્રાદક્ષિણ્યેન પૂજયેત્ ॥

ૐ ક્ષ્રૌં રુક્મિણી શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સત્યભામાશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં નગ્નજિત્તનયા શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ક્વજાઇ શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મિત્ર શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વૃન્દાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં લક્ષ્મણાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં જામ્બુવત્યાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સુશીલકાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મહિષોષ્ટજૈ શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સુવર્ણાભાયાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિચિત્રાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ભાસ્વતાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ભાસ્કરાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં રુન્મીલતાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં રમાકાઞ્ચિતાયૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
એતા સમ્પૂજ્ય મૂલેનમૂલદેવં ત્રિવારં તર્પયેત્ ।
પદ્મમુદ્રાં પ્રદર્શ્ય પુષ્પાઞ્જલિં દદ્યાત્ ।

અભીષ્ટસિદ્ધયેતિ ચતુર્થાવરણાર્ચનં ઇતિ ચતુર્થાવરણમ્ ।
અથ દ્વાત્રિંશપત્રેષુ સ્વાગ્રાદિ પ્રારભ્ય પ્રાદક્ષિણે પૂજયેત્ ।

ૐ ક્ષ્રૌં કૃષ્ણાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં રુદ્રાયશ્રી ક્ષ્રૌં માયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મહાઘોરાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં માયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ભીષ્ણાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ઉજ્વલાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કસવ્યાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિકરાલાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં દૈત્યાન્તાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મધુસૂદનાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં રક્ષાક્ષર્યશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પિઙ્ગલાક્ષયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં જન્મઙ્ગાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં દીપ્તતેજસે શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સઘોણશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં સુહનવાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિશ્વાક્ષ્યાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં રાક્ષસાન્તાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિશાલાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ધૂમ્રકેશવાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં હયગ્રીવાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ઘનસ્વનાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મેઘનાદાય પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મેઘવર્ણાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કુમ્ભકર્ણાય શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કૃતાન્તકાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં તીવ્રતેજાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં અગ્નિવર્ણાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મહોગ્રાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિશ્વભૂષણાય શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વિઘ્નક્રમાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં મહાસેનાય શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ ક્ષ્રૌં સિંહાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
એતાન્ સમ્પૂજ્ય મૂલેનમૂલદેવં ત્રિવારં તર્પયેત્ ।
સ્તમ્ભમુદ્રાં પ્રદર્શ્ય પુષ્પાઞ્જલિં દદ્યાત્ ।
અભીષ્ટાસિદ્ધેતિ પઞ્ચમાવરણાર્ચન ઇતિ પઞ્ચાવર્ણનમ્ ॥

તતો દિક્ષુદિક્કાલાન્ પૂજયેત્ પૂર્વાદિપ્રાદક્ષિણેન
ૐ ક્ષ્રૌં લં ઇન્દ્રાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં અં અગ્નિશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં યં યમશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં નિં નિરૃત્યાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વં વરુણાય શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં યાં વાયુશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં કં કુબેરશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ઈં ઈશાન્યાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ઈશાન ઇન્દ્રિયોર્મધ્યે
ૐ ક્ષ્રૌં બ્રાહ્મણેશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
નિઋત્યવરુણમધ્યે
ૐ ક્ષ્રૌં અં અં નં અં નં શ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં વજ્રાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં શક્ત્યૈશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં દણ્ડાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ખડ્ગાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પાશાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં અઙ્કુશાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ગદાશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ત્રિશૂલાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં પદ્માયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ચક્રાયશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
પુનઃ પુષ્પાઞ્જલિમાદાય મૂલેનમૂલદેવં પૂજયેત્ ।
જ્ઞાનમુદ્રાં પ્રદર્શ્ય અભીષ્ટસિદ્ધેતિષષ્ટમાવરણાર્ચનં
ઇતિ ષષ્ટમાવરણન્ । તતો ચતુદ્વરિપુસ્વાગ્રાદિક્રમેણ
ૐ ક્ષ્રૌં બં બટુકનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ૐ ક્ષ્રૌં યાં યોગિનીનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ક્ષેત્રપાલનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ ક્ષ્રૌં ગં ગણપતિનાથશ્રી પાદુકાં પૂજયામિ તર્પયામિ નમઃ ।

ઇતિ ચતુષ્ટયં સમ્પૂજ્ય મૂલેનમૂલદેવં ત્રિવારં તર્પયેત્ ।
તત્ત્વમુદ્રાં પ્રદર્શ્ય પુષ્પાઞ્જલિં દદ્યાત્ ।
અભીષ્ટસિદ્ધતિ સપ્તમાવરણાર્ચનં ઇતિ સપ્તમાવરણનમ્ ।
તતો મૂલેનબિન્દુ પરિતઃ શ્રીલક્ષ્મીસહિતાય શ્રીનૃસિંહાય નમઃ ।
ષોડશવારં તર્પયેત્ । સાઙ્ગેતિ પઠેત્ ।
ૐ ક્ષ્રૌં હ્રીં શ્રીં ક્લીં હ્રૌં હું શ્રીલક્ષ્મીનૃસિંહાય હૂં હ્રૌં ક્લીં શ્રીં હ્રીં ક્ષ્રૌં ૐ નૃસિંહનરહરાયસાઙ્ગાયસપરિવારાય સહનાય સાયુધાયસાલઙ્કારાય શ્રીલક્ષ્મીનૃસિંહાય નમઃ । ત્રિવારં તર્પયેત્ । પુનઃ પૂજાં કલ્પયેદ્યથામૂલાન્તે પરમાનન્દ સૌરભ્ય પરિપૂર્ણ દિગન્તરં ગૃહાણ પરમગન્ધં કૃપયા પરમેશ્વર । શ્રીલક્ષ્મીનૃસિંહાય ગન્ધં પરિકલ્પયામિ નમઃ । ગન્ધં સમર્પ્ય અધોમુખ કનિષ્ઠાઙ્ગુષ્ઠયોગેન ગન્ધમુદ્રાં પ્રદર્શ્ય તતઃ પુષ્પાનાદાયમૂલાન્તે તુરીયવનસમ્ભૂતં નાનાગુણમનોહરં આનન્દસૌરભં પુષ્પં ગૃહ્યતામિદમમદ્ભુતં શ્રીલક્ષ્મીનૃસિંહાય પુષ્પં સમર્પયામિ નમઃ । અધોમુખતર્જનાઙ્ગુષ્ટયોગેન પુષ્પમુદ્રાં પ્રદર્શ્ય તતો ધૂપપાત્રં અસ્મેણ સમ્પ્રોક્ષ્ય નમઃ ઇતિ ધૂપપાત્રે ધૂપં દત્વા વામતર્જનીયં સ્પૃશન્ મૂલમુચ્ચાર્ય વનસ્પતિરસોદિવ્યૌગન્ધાઢ્યો ગન્ધયુન્નમઃ । આધેયં સર્વદેવાનાં ધૂપોયં પ્રતિગૃહ્યતામ્ । શ્રીલક્ષ્મીનૃસિંહાય સમર્પયામિ નમઃ । ઘણ્ટાં સમ્પૂજ્ય વામકરે ગૃહીત્વા દક્ષકરે ધૂપપાત્રં ત્રિવારં ભ્રામયેત્ । ઇતિ ધૂપં તર્જનાઙ્ગુષ્ઠયોગેન ધૂપમુદ્રાં પ્રદર્શ્ય તતો દીપપાત્રં દેવતાગ્રે સંસ્થાપ્ય રં ઇતિ પ્રજ્વાલાસ્મેણ સમ્પ્રોક્ષ્ય ચક્રમુદ્રાં પ્રદર્શ્ય ઉત્તોલ્ય સુપ્રકાશો મહાદીપ સર્વત્ર તિમિરાપહઃ સબાહ્યાભ્યન્તરઃ જ્યોતિં દીપોયં પ્રતિગૃહ્યતાં ૧ પૂર્વવત્ ઘણ્ટાં વાદયન્ પાદાદિદૃષ્ટિપર્યન્તં ત્રિવારં ભ્રામયેત્ ॥

શ્રીલક્ષ્મીનૃસિંહાય તેજોમયં દીપં સમર્પયામિ નમઃ । મધ્યમાઙ્ગુષ્ઠયોગેન દીપમુદ્રાં પ્રદર્શ્ય તતો મહાનૈવેદ્યં પૂજામણ્ડપાત્ ભોજનમણ્ડપે રત્નસિંહાસનોપરિ આવાહ્ય દેવતાં ષ્કોણવૃત્ત ચતુરાસ્ત્રં મણ્ડલં કૃત્વા ન્હીં આધારશક્તૌ નમઃ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય નમઃ ઇત્યાધારં પ્રક્ષાલ્યમણ્ડલે નિધાય અસ્મેન પ્રક્ષાલિત પાત્રં આધારે નિધાય તત્ર ચતુર્વિધાન્નં સમ્પૂર્ણં ભક્ષભોજ્યચોષ્યલેહ્યાત્મકં અસ્ત્રમન્ત્રેણ સમ્પ્રોક્ષ્ય તત્ર વાયુવીજેન દ્વાદશવારાભિમન્ત્ર્ય તદુત્યવાયુના તદ્દોષંસંશોષ્ય દક્ષિણકરતલેગ્નિબીજં વિચિન્ત્ય તત્પૃષ્ઠલગ્નં વામકરતલં કૃત્વા દશધા સઞ્જપ્ય તદુત્થાગ્નિના તદ્દોષદગ્ધં વિભાવ્ય પચાદ્વામકરતલે અમૃતબીજં વિચિત્ય તત્પૃષ્ટલગ્નદક્ષકરતલં કૃત્વા દશધા પ્રજપ્ય તદુત્થામૃતધારયા જ્વલિતં વિભાવ્ય ચન્દ્રબીજં ચામ્બુસંસ્થં ચતુર્દશસ્વરાન્વિતં નાદબિન્દુસમાયુક્તં બીજં તદમૃતાત્મકં ઇત્યનેન સપ્તવારમભિમન્ત્ર્ય મૂલમષ્ટધા પ્રજપ્ય તતો દક્ષહસ્તેન જલં ગૃહીત્વા વામેનાચ્છાદ્યઋચં પઠેદ્યથા ૐ તત્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવિચક્ષુરાતતન્તદ્ધિ પ્રાશ્યોવિપન્યવો જાગ્રીવાંસઃ સમિધતેવિષ્ણોર્યત્પરમં પદં તેન જલેન સમ્પ્રોક્ષ્ય વમિતિધેનુમુદ્રયામૃતીકૃત્ય અસ્ત્રેણ તાલત્રયં ચ દિગ્બન્ધનં કુર્યાત્ ॥

તદુપરિવિશેષાર્ઘં બિન્દુયુક્તં પુષ્પં દત્વા તદન્ન સકાશાત્ કિઞ્ચિત્ કિઞ્ચિત્ તં ગૃહીત્વા એકીકૃપિડાન્ કૃત્વા વક્ષ્યમાણબટુકાદીનાં બલિદાનાર્થં સ્થાપયેત્ । તતો દેવતાયૈ પુષ્પાઞ્જલિં દત્વા તન્મુખાત્તેજો વિનિર્ગતમિતિ ધ્યાત્વા વામાઙ્ગુષ્ઠેન નૈવેદ્યપાત્રં સ્પૃષ્ટ્વા દક્ષિણકરેણ પુષ્પયુક્તં જલં ગૃહીત્વા મૂલાન્તે સત્પાત્રેષુ હવિઃ સૌખ્યં વિવિધાનેક ભક્ષણં નિવેદયામિ । તદેવં સ્વાનુગાયૈજુષાણ તત્ ઇતિ શ્લોકં જપ્ત્વા સાઙ્ગાયેતિ પઠન્ શ્રીલક્ષ્મીનૃસિંહાય યથાકાલોત્પન્નં નૈવેદ્યં સમર્પયામિ નમઃ । ઇતિ જલમુત્સૃજ્ય ॥

તતઃ આચમનં દદ્યાત્ અમૃતોપસ્તરણમસિ સ્વાહેતિ દેવહસ્તે જલં દદ્યાત્ નૈવેદ્યમુદ્રાં પ્રદર્શ્ય દક્ષિણકરેણ પ્રાણાદીપચમુદ્રાં પ્રદર્શ્ય વામકરતલે વિકચોત્પલસદૃશીં ગ્રાસમુદ્રાં પ્રદર્શ્ય દક્ષિણકરેણ પ્રાણાદીપં ચ મુદ્રાં પ્રદર્શયેદ્યથા ૐ પ્રાણાય સ્વાહેત્યઙ્ગુષ્ટકનિષ્ઠાનામાભિઃ ૐ અપાનાય સ્વાહેત્યઙ્ગુષ્ઠ તર્જનીમધ્યમાભિઃ ૐ વ્યાજાય સ્વાહેતિ અઙ્ગુષ્ઠમધ્યમાનામાભિઃ ૐ ઉદાનાય સ્વાહેત્યઙ્ગુષ્ટ તર્જનીમધ્યમાભિઃ ૐ સમાનાયસ્વાહેત્યઙ્ગુષ્ટાદિસર્વાભિઃ તતો ભુઞ્જાનાં ધ્યાયેત્ બ્રહ્મેશાદ્યૈઃ પરિસરમભિતં સૂપવિષ્ટાં સમન્તાત્સિજદ્વાલ વ્યજનાનિકરૈર્વાજ્યમાનાસખીભિઃ નર્મક્રીડાપ્રહસન પરાં પઙ્ક્તિ ભોક્તૄન્ હસન્તી ભુઙ્ક્તે પાત્રે કનકઘટિતે ષડ્રસાન્ ॥

વિશ્વમાતઃ ઇતિ દેવં ધ્યાત્વા તતઃ આવશ્યપૂજાઙ્ગત્વેન હોમં કુર્યાદ્યથા દેવતાદક્ષભાગે કુણ્ડે સ્થણ્ડિલે હસન્ત્યાં વા પ્રાગગ્ર ઉદગ્રાશ્ચતસ્રોરેખા કૃત્વા ચતુઃસંસ્કારાન્ કુર્યાદ્યથા મૂલેન વીક્ષ્ય મૂલાસ્ત્રેણ સમ્પ્રોક્ષ્યતેનૈવદર્ભેન સન્તાડચ કવચેન મુષ્ટિનાશ્રિત જલેન સિઞ્ચ્ય તતો ત્રિકોણમધ્યે કોષ્ઠે મૂલમુચ્ચાર્યાગ્નિ સંસ્થાપ્ય અથાગ્નિમન્ત્રસ્ય ભૃગુ ઋષયે નમઃ શિરસિ । ગાયત્રી છન્દસે નમો મુખે । અગ્નિર્દેવતાયૈ નમો હૃદયે । રં બીજાય નમો ગુહ્યે । સ્વાહા શક્તયે નમઃ પાદયોઃ । કલાકીલકાય નમઃ સર્વાઙ્ગે । ૐ સહસ્રાર્ચિષે અઙ્ગુષ્ઠાભ્યાં નમઃ । ૐ સ્વસ્તિ પૂર્ણાયતર્જનીભ્યાં સ્વાહા । ૐ ઉત્તિષ્ઠપુરુષાયમધ્યમાભ્યાં વષટ્ । ૐ ધૂમ્રવ્યાપિને અનામિકાભ્યાં હુમ્ । ૐ સપ્તજિહ્વાય કનિષ્ઠિકાભ્યાં વૌષટ્ । ૐ ધનુર્ધરાય કરતલકરપૃષ્ટાભ્યાં ફટ્ । એવં હૃદયાદિ તતો સ્વહૃત્કમલે ધ્યાયેદ્યથા ધ્યાયેદ્વહ્નિ હેમવર્ણં શક્તિ સ્વસ્તિકધારિણં વરાભયવિશોભાઢ્યં સ્વર્ણામ્બરવિભૂષણં એવં ધ્યાત્વા માનસોપચારૈઃ સમ્પૂજ્ય જાઠરાગ્નિનાસહ ઐક્યં વિભાવ્યાવાહયેત્ ॥

આવાહનાદિ આયુધાન્તાં મુદ્રાં પ્રદર્શ્ય તતો ગન્ધાદિ પઞ્ચોપચારૈઃ સમ્પૂજ્ય મૂલેન હોમદ્રવ્યાણિ સમ્પ્રોક્ષ્ય વમિતિધેનુમુદ્રયામૃતીકૃત્ય તતો ઘૃતેન વ્યાહતિજુહુર્યદ્યથા ૐ ભૂઃ સ્વાહા । ૐ ભુવઃ સ્વાહા । ૐ સ્વઃ સ્વાહા । ૐ ભૂર્ભુવઃ સ્વાહા વૈશ્વાનર જાતવેદ ઇહાગચ્છ લોહિતાક્ષ સર્વકર્માણિ સાધય સ્વાહા । અનેન ત્રિવારં જુહુયાત્ । તતો ભોજનમણ્ડપાતત્તત્ર દેવમાવાહયેત્ । પઞ્ચોપચારૈઃ સમ્પૂજ્ય પૂર્વવત્ ૐ ભૂઃ સ્વાહેતિ વ્યાહૃતિહોમં કુર્યાત્ । પશ્ચાન્મૂલમન્ત્રેણ દેવેશં જુહુયાત્ । પઞ્ચાહુતક્રિમાત્ પ્રાણાપાનૌ તથા વ્યાનમુદાનં ચ સમાનકં તતઃ ૐ ક્ષ્રૌં હૃદયાય નમઃ હૃદિદેવં સ્વાહેતિ ષડઙ્ગેન ષડાહુતિ જુહુયાત્ । તતો મૂલેન પઞ્ચવિંશતિર્જુહુયાત્ । નિત્યહોમવિધિં કૃત્વા બલિદાનવિધિં ચરેત્ । ઈશાને ચ તથાગ્નેયેનૈઋતે ચ તથાપ્રિયે વાયવ્યાં ક્રમતો દેવ મણ્ડલાનાં ચતુષ્ટયં ચક્રમાભિતો દેવ ત્રિકોણં વ્યોમમાલિખેત્ । એવં મણ્ડલાનિ કૃત્વા પૂજયેદ્યથા ॥

ૐ હ્રીં વ્યાપકમણ્ડલાય ઐં નમઃ ઇત્યનેન સમ્પૂજ્ય બટુકીદીન્બલિં દદ્યાદ્યથા એહ્યેહિદપુત્રબટુકનાથ કપિલ

જટાભારભાસુર ત્રિનેત્રજ્વાલામુખ સર્વ વિઘ્નાન્નાશય સર્વોપચાર સહિતં બલિં ગૃહાણ સ્વાહેતિ મન્ત્રેણ બલિં દદ્યાત્પશ્ચાદ્વામાઙ્ગુષ્ઠ તર્જનીભ્યાં મુદ્રાં પ્રદર્શ્ય તસ્યોપરિ બલિં પાત્રામૃતેન બિન્દું ક્ષિપેત્ એવં પ્રતિમુદ્રાંબોદ્ધવ્યં ઊર્ધ્વં બ્રહ્માણ્ડતોવાદિવિગગનતલે ભૂતલે નિષ્કલે વા પાતાલે વા પવનસલિલયોર્યત્રકુત્રસ્થિતા વા ક્ષેત્રેપીગેપપીગદિષુચકૃત પદાધૂપદીપાદિકેન પ્રીતાદેવ્યઃ સદાનઃ શુભબલિવિધિના યાન્તુ વીરિદ્રવન્દ્યાઃ યાં યોગિનીભ્યઃ સ્વાહેતિમન્ત્રેણ બલિં દદ્યાત્ । પશ્ચાદઙ્ગુષ્ઠમધ્યમાનામાભિર્યોન્યાકારાં મુદ્રાં પ્રદર્શ્ય ક્ષાં ક્ષોં ક્ષૂં ક્ષૈં ક્ષૌં ક્ષં હું સ્થાન ક્ષેત્રપાલ સર્વકામપૂરયર સ્વાહેતિ મન્ત્રેણ બલિં દદ્યાત્ પશ્ચાદ્વામાઙ્ગુષ્ટતર્જની સરલયા મુદ્રાં પ્રદર્શ્ય ગાં ગીં ગૂં ગૈં ગૌં ગઃ ગણપતયે વરદ સર્વજનં મેવશમાનય સર્વાપચાર સહિતં બલિં ગૃહાણ । સ્વાહેતિ મન્ત્રેણ દદ્યાત્ તત્ત્વમુદ્રાં પ્રદર્શ્ય બલિ પાત્રામૃતેન બિન્દુ ક્ષિપેત્ ઇતિ બલિદાન વિધિઃ ॥

અદત્વાબટુકાદીનાં યઃ પૂજયાતિ ઈશ્વરં પૂજા ચ વિફલા તસ્ય દેવશાપઃ પ્રજાયતે । તતો ગ્રેંસકાશાત્ ભોજનસ્થાને દેવમાવાહ્ય સ્વહૃદિ વહ્નિ વિસર્જયેદ્યથા ભો ભો વહ્ને મહાશક્તે ગ્રેઃ સર્વકર્મપ્રસાધકઃ કર્માન્તરેઽપિ સમ્પ્રાપ્તે સાન્નિધ્યં કુરુ સાદરં પૂજાયાઃ વિપુલં રાજ્યં અગ્નિકાર્યેન સમ્પદઃ । જપેન પાપાસંશુદ્ધિર્જ્ઞાનં ધ્યાનેન ઉચ્યતે ઉત્તરાયૌષણં દદ્યાદ્યથા અમૃતાપિધાનમસિ સ્વાહેતિ તતો નૈવેદ્યજાતમુધૃત્ય સ્થાનશુદ્ધિં વિધાય ચ આચમનં જલં દદ્યાત્ । દન્તશોધનમેવ ચ સુગન્ધલેપનં દ્રવ્યેણ હસ્તલેપનં દત્વા પુનઃ પાનીયમર્પયેત્ । પુનઃ નાનોપચારાન્ મૂલેન પથા સ્થાને સમર્પ્ય તતઃ તામ્બૂલં દદ્યાત્ । પૂગીફલમ્મહાદિવ્યં નાગવલ્લીદલાન્વિતં કર્પૂરાદિ સમાયુક્તં તામ્બૂલં પ્રતિગૃહ્યતાં શ્રીલક્ષ્મીનૃસિંહાય તામ્બૂલં સમર્પયામિ નમઃ । ચક્રમુદ્રામ્પ્રદર્શ્ય પુનઃ પાદુકામુદ્રાં પ્રદર્શ્ય પૂજાસ્થાને સમાનીય પુનર્મૂલેન છત્રં સમર્પ્ર્યયામિ નમઃ । ચામરયુગ્મં સમર્પયામિ નમઃ । વ્યજનયુગ્મં સમર્પયામિ નમઃ । રત્નોજ્વલં દર્પણં સમર્પયામિ નમઃ । હિરણ્યમયીં દક્ષિણાં સમર્પયામિ નમઃ । પુનઃ પૂર્વવગ્દન્ધ પુષ્પધૂપાન્ દત્વા નીરાજનં કુર્યાદ્યથા સૌવર્ણરાજતે કાંસ્યેસ્થાલકે પરમેશ્વરઃ શુદ્ધ્યસ્મેનસંશોધ્યકુઙ્કુમેન વિલિખેત્પદમં વસુપત્રં મનોહરં મધ્યે ચારૂં ચન્દ્રરૂપં કૃત્વા તન્મસ્તકે પ્રિયે દીપમેકં વિનિક્ષિપ્ય વસુપત્રેષ્ટદીપકન્ યવગોધૂમદુગ્ધાદિરચિતાન્ શર્કરાયુતાન્ ચણકાન્વિતં મુદ્રાભિઃ શોભિતાન્ ધૃતપાચિતાન્ કર્પૂરવર્ત્તિકાયુક્તૈર્ગોધૃતેન ચ પૂરયેત્ રં બીજેન પ્રજ્વાલ્ય સઙ્કુલ્પં કારયેત્પશ્ચાત્કર્મણા મનસેપ્સિતં અભિમન્ત્ર્યમહેશાન્નિ ॥

રત્નૈશ્વર્યાં તતઃ પરં શ્રીં હ્રીં ગ્લૈં સ્લૂં પ્લૂં મ્લૂં ન્કૂં ક્લીં શ્રીં ઇતિ મન્ત્રેણ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય પશ્ચામૂલેન સમ્પૂજ્ય ચક્રમુદ્રાં પ્રદર્શ્ય વમિતિધેનુમુદ્રાં પ્રદર્શ્ય મત્સ્યમુદ્રયાછાદ્ય તતસ્થાલકં સમુદ્ધૃત્ય મસ્તકાન્તં પુનઃ પુનઃ નવવારં મહેશાનિ તતો નીરાજનં ચરેત્ મૂલેન સમસ્તચક્રચક્રેશયુતે દેવનવાત્મકે આરાત્રિકં મિદં દેવ ગૃહાણ મમ સિદ્ધયે ઇત્યુક્ત્વા ઘણ્ટાવાદનપૂર્વકં આપાદશિરપર્યન્તં ભ્રામયેન્નવધાપ્રિયે સંસ્થાપ્ય કર્પૂરદીપેન ત્રિધાની રાજ્ય ઉપવિશ્ય હસ્તૌપ્રક્ષાલ્યમૂલેન યથાસ્થાને પૂર્વવત્પઞ્ચપુષ્પાઞ્જલિં દદ્યાત્ । તતો મૂલાદિબ્રહ્મરન્ધાન્તં મૂલવિદ્યાં સૂર્યસોમાગ્નિરૂપિણીં ચતુર્વર્ગઃ ત્વયિ ન્યસ્તસ્માન્મે સિદ્ધિ સદા ભવ ॥

ૐ ગં હ્રીં ગં ગજતુણ્ડ અવિઘ્નં કુરુ માલે ત્વં જપકાલે સદા મમ । નિર્વિઘ્નં કુરુ દેવેશ સુરાત્મિક નમોઽસ્તુતે ઇતિતસ્યોપરિ મન્ત્રં પઠેત્ । ચક્રમુદ્રામ્પ્રદર્શ્ય તાં દક્ષહસ્તે ગૃહીત્વા મધ્યમા મધ્યપર્વણિ સંસ્થાપ્ય સ્વહૃદયમાનીય શિરસિ ગુરું નમસ્કૃત્ય કણ્ઠે મન્ત્રં પીતવર્ણં વિચિંત્ય હૃદયેષુ ઇષ્ટદેવતાં પ્રસન્નાન્ધ્યાયન્ તદૈકચિત્તો ભૂત્વા પઠેત્ । તત્રાદૌ અષ્ટોત્તરશતં પ્રણવં પ્રજપ્ય જાતસૂતકમાદૌ સ્યાન્મૃતે ચ મૃતસૂતકં સૂતકદ્વયમુક્ત્યર્થમાદાવન્તે ચ તૃકં યથા

સઙ્ખ્યાષ્ટોત્તરશતત્રયં વા સહસ્રં પ્રજપ્ય પશ્ચાત્ માલાં શિરસિ સંસ્થાપ્ય પુનઃ પૂર્વવત્ સ્વસ્થાને કુલ્લકાંસઞ્જપ્ય ગુહ્યાતિગુહ્યગોશ્રીત્વં ગૃહાણાસ્મત્કૃતં જપં સિદ્ધિઃ ભવતુ મે દેવિ ત્વત્પ્રસાદાત્મહેશ્વરી ઇત્યનેન દેવીં વામકરે જપજલં સમર્પ્ય ઉક્તં ચ કુલાર્ણવે જન્માન્તરસહસ્રેષુ કૃતપાપપ્રણાશનાત્ પરદેવ પ્રકાશચ જપ ઇત્યભિધીયતે । પુનઃ પૂર્વવદાચમ્ય પ્રાણાનાયામ્ય સંહારક્રમેણ ઋષ્યાદિકં કૃત્વા ધ્યાત્વા તથૈવ પૂજયેદ્યથા ભૂતાદીન્ પૂજયેત્ । લોકાન્ પૂજયેત્ । હાટકેશ્વરાદીન્ પૂજયેત્ ॥

એવં અરવર્ણાનિવિલાપ્ય સમષ્ટિતેજોરૂપં વિભાવ્ય પુનઃ ગન્ધપુષ્પાભ્યાં સમ્પૂજ્ય પશ્ચાત્કુમારિબટુકગુરુ આચાર્ય શામ્ભવાન્ ગુરુપદિષ્ટમાર્ગેણ પૂજયેત્ । ઉત્થાય પ્રદક્ષિણાં કૃત્વા દણ્ડવન્નમસ્કૃત્ય પશ્ચાત્કવચસ્તોત્ર સહસ્રનામશાન્તિસ્તોત્રદિનિ યથા સાવકાશં પઠેત્ । નોચેદ્વિસર્જનાનન્તરં પઠેદિત્યાવશકમ્ । પૂર્વવત્પુષ્પાઞ્જલિં યથાસ્થાને સઙ્ક્ષિપેત્ । સ્તમ્ભનાદિપઞ્ચમુદ્રયા નમસ્કૃત્ય દેવં વિસર્જયેદ્યથા સંહારમુદ્રયાયન્ત્રસ્થ પુષ્પં ગૃહીત્વા પઠેદ્યથા ગચ્છ ગચ્છ સુરશ્રેષ્ઠ સ્વસ્થાને પરમેશ્વર યત્ર બ્રહ્માદયો દેવાન્ વિદુઃ પરમં પદં આઘ્રાય પરમેશ્વરં સ્વહદિ ઉદ્વાસ્ય તત્પુષ્પં ભૂમૌ નિધાય શિરસિ ધારયેત્ । તતો ગતસાર નૈવેદ્યં કિઞ્ચિદુધૃત્ય પિણ્ડં કૃત્વા ઈશાને પૂર્વવત્પડલં કૃત્વા ઉચ્છિષ્ટચાણ્ડાલિન્યૈ નમઃ ઇતિ મન્ત્રેણ બલિં દદ્યાત્ । તસ્યોપરિ કિઞ્ચિદ્બિંદુઃ ક્ષિપેત્ । હસ્તૌ પ્રક્ષાલ્ય પુનઃ માલાં પૂજયેત્ । ત્વં માલે સર્વદેવાનાં પ્રીતિદાશુભદા મમ શુભં કુરુષ્વ મે ભદ્રે યશો વીર્યં ચ દેહિ મે । હ્રીં સિદ્ધૌ નમઃ ઇતિ ગન્ધપુષ્પાભ્યાં માલાં સમ્પૂજ્ય રહસિ સંસ્થાપ્ય પશ્ચાબ્દલિપાત્રસ્યદેવતાઃ નારાચમુદ્રયાવિસૃજ્ય પશ્ચાબ્દલિવિસર્જનં કુર્યાદ્યથા પૂર્વસ્થાપિતબલિપાત્રસ્થમન્ત્રમેકપાત્રે કૃત્વા પૂજાગૃહાબ્દહિઃ પૂર્વવન્મણ્ડલં કૃત્વા તત્ર બલિં દદ્યાદ્યથા ગદાત્રિશૂલડમરૂપાત્રહસ્તં ત્રિલોચનં કૃક્ષાભમ્ભૈરવં ધ્યાયેત્સર્વવિઘ્નનિવારણમ્ । એવં ધ્યાત્વા તત્ર દદ્યાત્ ઉચ્છિષ્ટભૈરવ એહ્યેહિ બલિં ગૃહાણ હું ફટ્ સ્વાહેતિ તદનં તત્ર વિસૃજ્ય પશ્ચાત્કૃતાઞ્જલિપુટોભૂત્વા પઠેત્ । યજ્ઞછિદ્રં જપછિદ્રં છિદ્રં ચ પૂજને મમ સર્વં ધાર્યસુભપાત્રન્યુઞ્જીકૃત્ય તત્ર પુષ્પં દત્વા તદમૃતસ્નિગ્ધભૂમૌમાયાંવિલિખ્ય વામહસ્તકનિષ્ઠકયાએકીકૃત્ય તિલકં કુર્યાદ્યથા યં યં સ્પૃશામિ પાદેન યં યં પશ્યામિ ચક્ષુષા સ એવ દાસતાંયાતુ યદિ શક્રસમો ભવેત્ । ઇતિ મન્ત્રેણ તિલકં કુર્યાત્ ॥

તતઃ સર્વ પાત્રસ્થબિન્દુ આત્મપાત્રે નિક્ષિપ્ય તેનાત્મનિવેદનં કુર્યાદ્યથા દક્ષહસ્તે જલપુષ્પાક્ષતાન્ ગૃહીત્વા ૐ ઇતિ પૂર્વપ્રાણબુદ્ધિર્દેહ ધર્માધિકારાનાજાગ્રત્ ચ પ્રસુષુપ્તિતુરીયાવસ્થાયાં સમનસા વાચાહસ્તાભ્યાં પદ્ભ્યામુદરેણ શિશ્નેન યત્ સ્મૃતં યદુક્તં યત્કૃતં તત્સર્વં ગુરૂદેવતા પ્રીયતાં નમઃ । ઇતિ પઠિત્વા બ્રહ્મરન્ધ્રે નિક્ષિપ્ય ગુરુદેવઃ શિવઃ સાક્ષાત્તત્પત્નીતત્સ્વરૂપિણી અભેદેન ભજેદ્યસ્તુ તસ્ય દેવઃ પ્રસીદતિ । પાત્રાણિ પ્રક્ષાલ્ય ગોપયેત્ । યન્ત્રલેપં સ્વબ્રહ્મરન્ધ્રે લેપયેત્ । યતીનાં માનસી પૂજાવનીનાં વનસમ્ભવૈઃ વર્ણાનાં ભિક્ષયાતોષ્ય ગૃહસ્થદ્રવ્યસમ્ભવૈઃ માનસીસિદ્ધિકામસ્તુ વનસ્થઃ પુષ્ટિસિદ્ધયે ભિક્ષયાવાક્પ્રદાવાણિ ગૃહસ્થઃ સર્વસિદ્ધ્યે નિત્યાતિક્રમદોષેણ શતં વિદ્યાં જપેત્સુધીઃ નૈમિત્યક્રમદોષેણસહસ્રં પ્રજપેત્સુધીઃ નિત્યનૈમિત્તિકં કામ્યમ્માપેક્ષામ્પૂર્વપૂર્વતઃ નિત્યં નૈમિત્તિકં વ્યક્ત્વા કામ્યં કુર્વતિ યે જનાઃ તેષાન્તાનિ વિનશ્યન્તિ શિલાયામુપ્તબીજવત્ કામ્યાતિક્રમદોષેણ ગુરુપૂજાં સમારભેત્ ગુરુપૂજારતો મન્ત્રી સર્વાન્કામાનવાપ્નુયાત્ । ગુરુમુખ્યક્રિયાસર્વાસાવિમર્ષમયી સદા વિમર્શોહિ શિવઃ સાક્ષાચ્છિવરૂપો ગુરુઃ સદા ગુરુપૂજાસદાકાર્યા પૂજાદૌતપહોમયોઃ ગુરુપૂજાં વિહાયસ્તુ શિલાયામુપ્તબીજવત્ છ ઇતિ શ્રી વામકેશ્વર તન્ત્રે તન્ત્રાનુસારેણ ગુરુમુખાત્ જ્ઞાતં બ્રહ્માણ્ડાનન્દનાથેનકૃતા શ્રીલક્ષ્મીનૃસિંહાર્ચન પદ્ધતિઃ

સમાપ્તા ॥

સમ્પૂર્ણં શ્રીરસ્તુ । શુભં ભવતુ । કલ્યાણમસ્તુ ।
॥ લ. જા. ॥ બા. ગો ॥ શ્રી ॥ બ્રા. ॥ મુ. અં ॥

ઇતિ શ્રીનૃસિંહાર્ચનપદ્ધતિઃ સમ્પૂર્ણા ।

A note of caution or disclaimer:
The text here is given for
academic purpose, for information, only as it
appears in a book. Considered as a tantric text,
esoteric in nature, readers are advised caution
about its indiscriminate usage or application of
the same. It is very clear that a guru's
guidance is always essential for mantra
practices and practicing without the same
leads to no merit or can in fact backfire.

Proofread by M K Barman

---

*Shri Nrisimharchanapaddhatih*

pdf was typeset on October 15, 2025

Please send corrections to *sanskrit@cheerful.com*